हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

himsanskritvartah

e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-312

1 05.09.2024 गुरुवासरः वि.सं. २०८० भाद्रपदशुक्लतृतीया भाद्रपद 21 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com


# सिङ्गापुर्-देशस्य लायन्-सिटी-नगरे अभवत् भारतस्य प्रधानमन्त्रिणः भव्यं स्वागतम्



**हिमसंस्कृतवार्ताः।** प्रधानमन्त्री नरेन्द्रमोदी ब्रुनेई-देशस्य सफलं भ्रमणम् समाप्य राष्ट्रद्वयस्य यात्रायाः द्वितीये चरणे गतापराह्ने सिङ्गापुर्-देशस्य लायन्-सिटी-नगरं प्राप्तवान्। सिङ्गापुर्-देशस्य गृहकार्य-विधि- मन्त्रिणा के. षण्मुगम् इत्यनेन तस्य स्वागतम् कृतम्। श्रीमोदी स्वसमकक्षस्य लारेन्स् वोङ्ग इत्यस्य आमन्त्रणेन सिङ्गापुरस्य भ्रमणं कुर्वन् अस्ति। भ्रमणकाले उभावपि नेतारौ भारत-सिङ्गापुर-सामरिकसहभागित्वस्य प्रगतिं समीक्षितुं, परस्परहितानां क्षेत्रीय-वैश्विक-विषयेषु च विचाराणां विनिमयं करिष्यतः। पूर्वम्, उपग्रह प्रक्षेपण यानानां कृते टेलिमेट्री, ट्रैकिङ्ग, टेलिकमाण्ड्- केन्द्रस्य सञ्चालने परस्पर-सहयोगाय भारत-ब्रुनेई-देशौ एम्. ओ. यू. इति एतस्मिन् सन्धिपत्रे हस्ताक्षरं कृतवन्तौ। उभयदेशौ परस्पर हितानां सर्वेषु क्षेत्रेषु सम्बन्धं सुदृढं प्रगाढं च कर्तुं द्वैपाक्षिक- सम्बन्धान् अपि वर्धितुम् निर्णयम् अकुरुताम्। बन्दर्-सेरी-बेगावन् इत्यत्र प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य ब्रूनेई-देशस्य सुल्तान हाजी-हसनल्-बोल्किया इत्यस्य च मध्ये प्रतिनिधिस्तरीय वार्तायाः अनन्तरं अयं निर्णयः कृतः अस्ति। वार्तालापस्य समये स्वस्य भाषणे प्रधानमंत्रीः अवदत् यत्,भारतस्य एक्ट् ईस्ट् पालिसी इत्यस्य, इण्डो-पेसिफिक्-दृष्टिकोणस्य च महत्त्वपूर्ण सहभागिरूपेण ब्रुनेई-देशः उभयोः राष्ट्रयोः उज्ज्वल भविष्यस्य प्रत्याभूतिः अस्ति।

## देशस्य कस्यापि बैङ्कतः स्वस्य निवृत्तिवेतनम् प्राप्तुं शक्नुवन्ति कर्मचारिणः

कर्मचारी-निवृत्तिवेतन-योजनायाः निवृत्तिवेतनोपभोक्तारः अधुना जनवर्याः एकदिनाङ्कात् देशस्य कस्यापि बैङ्क-तः स्वस्य निवृत्तिवेतनम् प्राप्तुं शक्नुवन्ति । अनेन कर्मचारी भविष्यनिधि-सङ्घटनस्य अष्टसप्तति-लक्षतः अधिकाः निवृत्तिवेतनोपभोक्तारः उपकृताः भविष्यन्ति। केन्द्रीय-श्रम-रोजगार-मन्त्री डा. मनसुख-माण्डविया अवदत् यत् केन्द्रीकृत- निवृत्तिवेतन-देय-व्यवस्थायाः अनुमोदनं ई पी एफ ओ इत्यस्य आधुनिकीकरणे महत्त्वपूर्ण सोपानम् अस्ति इति। सः अवदत् यत् देशस्य कस्यापि बैङ्क-शाखायाः निवृत्तिवेतन-वितरणेन निवृत्तिवेतनोपभोक्तृणां दीर्घकालस्य समस्याः समाप्ताः भविष्यन्ति इति।

## कार्गिल्-मण्डले दुग्ध-उत्पादनस्य, पशुधन-प्रबन्धनस्य च उन्नत्यै त्रि-दिवसीय क्षमता- निर्माण-कार्यशाला

लद्दाखस्य कुर्बाथाङ्ग-नगरे, रोग-अन्वेषण-कार्यालय-सम्मेलन-सभागारे त्रि-दिवसीय क्षमता- निर्माण-कार्यशालायाः उद्घाटनम् अभवत्। लद्दाख कौशल-विकास-मिशन् इत्यस्य अन्तर्गतं मण्डल-कौशल-समित्या अयं उपक्रमः पशु-पालन-विभागेन सह सहयोगेन, सम्पूर्ण कार्गिल्-मण्डले दुग्ध-उत्पादनस्य, पशुधन-प्रबन्धनस्य च उन्नतेः कृते स्थानीय-दुग्ध-कृषकाणां आधुनिकपद्धतीनां सशक्तीकरणार्थं च परिकल्पितः अस्ति। अस्मिन् कार्यक्रमे, आधुनिक दुग्ध-प्रबन्धन-तन्त्राणि, रोग-निवारण-नियन्त्रणम्, दक्ष-दुग्ध उत्पादनं, पशुधन-स्वास्थ्यम्, उत्पादकतायाः च उन्नतेः रणनीतिः चेत्यादयः महत्त्वपूर्णाः विषयाः व्यापकरूपेण अन्तर्भवन्ति।

## कैमरून्-देशे मार्गदुर्घटनायां न्यूनातिन्यूनं अष्ट जनाः मृताः

कैमरून्-देशे मार्गदुर्घटनायां न्यूनातिन्यूनं अष्ट जनाः मृताः, पञ्चाशत-तः अधिकाः जनाः च व्रणिताः अभवन्। केचन पीडिताः अवकाशात् प्रत्यागताः छात्राः आसन्। स्थानीय-आरक्षकाणां मतेन, अस्य प्रदेशस्य ड्स्वाङ्ग-नगरे द्रुतगत्या गमनं कुर्वतां अनियन्त्रित-बस-यानस्य कारणात् दुर्घटना अभवत् । दुर्घटनायाः कारणं अद्यापि अन्विष्यते ।

## महाराष्ट्रस्य लातूर्-जनपदस्य उदगीर्-नगरे विश्वशांति-बुद्ध-विहारं राष्ट्राय समर्पणं कृतवती राष्ट्रपतिः



राष्ट्रपतिः द्रौपदी-मुर्मु वर्या महाराष्ट्रस्य लातूर्-जनपदस्य उदगीर्-नगरे विश्वशांति-बुद्ध-विहारस्य उद्घाटनम्, राष्ट्राय समर्पणं च कृतवती। राष्ट्रपतिः विहारस्य अन्तः गौतमबुद्धस्य प्रतिमाम् अपि प्रतिष्ठापितवती सहैव डा. बाबासाहेब-अम्बेड्कर्-वर्यस्य प्रतिमायाः उपरि पुष्पमालां समर्पयित्वा श्रद्धाञ्जलिम् प्रायच्छत्। अस्मिन् कार्यक्रमे पारम्परिकः बुद्धपूजा-समारोहः आसीत् । उदगीर्- नगरे उद्घाटितः नूतनः बुद्धविहारः कर्णाटकस्य कल्बुर्गी-नगरे बुद्धविहारस्य प्रतिरूपम् अस्ति। एषः पञ्चदश-हेक्टेयर्-परिमिते क्षेत्रे स्थितः अस्ति, यत्र द्वादश-शतम् अनुयायिनः निवासयोग्यं ध्यानकेन्द्रम् अस्ति।

## युक्रेन्-देशे न्यूनातिन्यूनं षट् अधिकारिणः निजपदेभ्यः त्यागपत्रं प्रदत्तवन्तः



युक्रेन्-देशे, मन्त्रिमण्डलस्य सदस्यैः सह न्यूनातिन्यूनं षट् अधिकारिणः, प्रत्याशितात् प्रमुख- सर्वकारीय-परिवर्तनाचरणात् प्राक् निजपदेभ्यः त्यागपत्रं प्रदत्तवन्तः। ये त्यागपत्रं दत्तवन्तः, तेषु उपप्रधानमन्त्री, युक्रेन्-देशस्य राज्य-सम्पत्ति-कोषस्य प्रमुखाः च सम्मिलिताः सन्ति। राष्ट्रपतेः वरिष्ठतमेषु सहायकेषु अन्यतमः रोस्टिस्लाव् शुरमा अपि राष्ट्रपतेः आदेशानुसारं निष्कासितः। 'सर्वेण्ट् आफ् द पीपल्स्' दलस्य सत्तारूढेन संसदीयनेतृणा प्रोक्तं यत्, अस्मिन् सप्ताहे प्रमुखे सर्वकारीय-पुनर्विन्यासे मन्त्रिमण्डलस्य अर्धभागः परिवर्तितः भविष्यति । एतत् परिवर्तनं तदा क्रियते यदा युक्रेन्-देशः स्वनगरेषु प्रतिदिनं रशियादेशस्य गोलिकाप्रहारं सम्मुखीकुर्वन् अस्ति, अपरत्र पूर्वदिशि मास्को-देशस्य लाभं प्रतिषिद्धं च सङ्घर्षं कुर्वन् अस्ति ।

## कोङ्कन, गोवा, गुजरात, असम, मेघालय, नागालैण्ड्, मणिपुर, मिजोरम, त्रिपुरा, उत्तर-पूर्वराजस्थानेषु च अत्यधिकवृष्टेः पूर्वानुमानम्

भारत-ऋतु-विभागेन अनुमानितं यत् अद्य गुजराते प्रचण्डवृष्टिः भविष्यति। ऋतु विभागेन आगामिषु सप्तदिनेषु कोङ्कन, गोवा, गुजरात, असम, मेघालय, नागालैण्ड्, मणिपुर, मिजोरम, त्रिपुरा, उत्तर-पूर्वराजस्थानेषु च अत्यधिकवृष्टेः पूर्वानुमानं प्रकटितम्। विभागेन सप्ताहे पश्चिममध्यपूर्वोत्तरभारते तटीयकर्नाटके केरले माहे-लक्षद्वीपे अण्डमाननिकोबारद्वीपसमूहे उपहिमालयीय पश्चिमबङ्गे सिक्किमे च व्यापकरूपेण लघुतः मध्यमवृष्टेः सम्भावना अपि प्रकटिता अस्ति।

## सुभाषितम्

**श्लिष्टा क्रियाकस्यचिदात्मसंस्था**
**सङ्क्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां**
**धुरि प्रतिष्ठापयितव्य एव।।**

**भावार्थः-** अपने विषय में सम्पूर्ण ज्ञान एक शिक्षक का गुण है, जबकि उस ज्ञान का छात्रों में सम्प्रेषण एक अन्य गुण है। जिसके पास यह दोनों की गुण है वही शिक्षक सर्वश्रेष्ठ कहलाता है।

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः

**हिमसंस्कृतम् प्रकाशनम्**

जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.

पत्रव्यवहारसङ्केतः- १७७१११


## बाङ्ग्लादेश-देशे स्वीडन्-अस्लम् इति नाम्ना अपि ख्यातः आतङ्किः शेख अस्लमः काशीम्पुर-उच्च-सुरक्षा केन्द्रीय कारागारात् मुक्तः

बाङ्ग्लादेश-देशे स्वीडन्-अस्लम् इति नाम्ना अपि ख्यातः आतङ्किः शेख अस्लमः गतरात्रौ ढाका- नगरस्य समीपे गाजीपुर-नगरस्य काशीम्पुर-उच्च-सुरक्षा केन्द्रीय कारागारात् मुक्तः अभवत्। सः द्वादश-प्रकरणेषु अपेक्षितः आसीत्, यत्र अवैध शस्त्राणां हत्यानां च विविधानि प्रकरणानि आसन्। ध्यानास्पदं वर्तते यत् द्विसहस्रतमस्य दशकस्य आरम्भे बाङ्ग्लादेश-नेशनलिस्ट्-पार्टी इत्यस्य नेतृत्वे चतुर्णां दलानां संयुक्त-सर्वकारस्य कार्यकाले घोषितेषु विंशति-प्रमुखेषु अपराधिषु अस्लमः अपि एकः अस्ति।

## श्रीगुरुग्रन्थसाहबः सम्पूर्ण विश्वे कोटिशः जनान् प्रेरयति,-प्रधानमन्त्री



श्रीगुरुग्रंथसाहबस्य प्रकाशपूरब पर्वणि प्रधानमन्त्री नरेन्द्रमोदी देशवासिभ्यः शुभकामनाः प्रदत्तवान् । एकस्मिन् सामाजिकसञ्जालपटलीय सन्देशे श्रीमोदी अवदत् यत् श्रीगुरुग्रन्थसाहबः सम्पूर्ण विश्वे कोटिशः जनान् प्रेरयति, जनान् अन्येषां सेवांयै परिचर्यायै च प्रेरयति। सः अवदत्, समाजे भ्रातृत्वस्य, सौहार्दस्य च भावं प्रवर्तयितुम् अपि जनान् प्रेरयति। श्रीगुरुग्रन्थसाहबस्य ज्ञानेन समाजे सामंजस्य स्थापयितुं जनानां मार्गदर्शनं भविष्यति इति प्रधानमन्त्रिणा आशा प्रकटिता।

# वर्षद्वयेभ्यः सत्तायामस्ति सुक्खुः वर्तमानस्थितेः उत्तरदायी अपि सः एव अस्ति : जयरामठाकुरः



**हिमसंस्कृतवार्ताः - शिमला।** विपक्षस्य नेता जयरामठाकुरः उक्तवान् यत् काङ्ग्रेसः सुखविन्दरसिंहसुक्खोः इत्यस्य नेतृत्वे प्रायः वर्षद्वयेभ्य सर्वकारं चालयति। परन्तु ते स्वस्य प्रत्येकं असफलतायाः दोषं केन्द्रसर्वकारस्य पूर्वभाजपासर्वकारस्य च उपरि ददति। सुखविन्दरसिंहसुक्खोः वित्तीयनीतयः अद्यतनस्य वर्तमानस्थितेः उत्तरदायी सन्ति, याः राज्यस्य विकासाय जनहिताय च न अपितु मित्रहिताय उन्मुखीभवन्ति। भाजपा अपि पञ्चवर्षपर्यन्तं सर्वकारं चालितवती । तस्मिन् काले समग्रं विश्वं कोरोना इव विभीषिकया सम्मुखीभूतः आसीत् । सर्वे आर्थिकक्रियाकलापाः पिहिता एव आसन् । प्रायः वर्षद्वयं यावत् चलितस्य अस्मिन् काले अपि एकस्य अपि कर्मचारिणः वेतनं दातुं एकः अपि विलम्बः न अभवत् । कस्यचित् वेतनस्य एकं नाणकम् अपि न कटितम्, भवेत् तत् आउटसोर्सड्, पैरा वर्कर, नियमित वा अनुबन्धिककर्मचारिणः वा अन्यः कोऽपि वा। प्रतिकूल आर्थिकस्थित्या अपि राज्यस्य स्वास्थ्यव्यवस्था सुदृढा अभवत् । एतत् सर्वं अस्माकं पूर्वसर्वकारेण जनहितविषयेषु प्राथमिकता दत्ता इति कारणेन अभवत् । अस्मिन् काले हिमकेयर इत्यादयः योजनाः राज्यस्य जनानां कृते तेषां चिकित्सायाः कृते समर्पिताः आसन् । परन्तु सुक्खुसर्वकारः सर्वाः योजनाः पिहितं कर्तुं आरब्धवान् । अद्य Him Care Scheme इत्यस्य स्थितिः का अस्ति ? सहारायोजनायाः का स्थितिः ? सामाजिकसुरक्षापेन्शनस्य स्थितिः का अस्ति ? शगुन, स्वावलम्बन इत्यादीनां योजनानां का स्थितिः ? पूर्वभाजपासर्वकारः कल्याणकारीराज्यवत् जनसेवां कुर्वन् आसीत् । वर्तमानसर्वकारस्य कार्याणि सर्वथा कल्याणराज्यस्य कार्याणि वक्तुं न शक्यन्ते । सर्वकारः केवलं करवर्धनं, सुविधानां हरणं च कुर्वन् अस्ति । वर्तमानवित्तीयस्थितेः उत्तरदायित्वं सुक्खुसर्वकारस्य आर्थिकदुर्व्यवस्थापनस्य अस्ति, यस्य परिणामः राज्यस्य जनाः वहन्ति।

### सदने कङ्गनाविषये कृता टिप्पणी अपमानजनका मन्त्रिणा क्षमायाचना कर्तव्या

मीडियाप्रश्नानां उत्तरे विपक्षनेता उक्तवान् यत् सदनस्य अन्तः कङ्गनायाः विषये कृताः टिप्पण्याः दुर्भाग्यपूर्णाः सन्ति। महिलासांसदायाः विषये अनुचितं टिप्पणं करणं बोधात् परम् अस्ति। यः व्यक्तिः स्वपक्षं प्रस्तोतुं सदने न वर्तते। तस्य विषये एतादृशाः टिप्पण्यः करणं सदनस्य शिष्टाचारस्य विरुद्धम् अस्ति। अस्य टिप्पण्याः कृते सः क्षमायाचनां कुर्यात्।

# पूर्वभाजपासर्वकारेण राज्यकोषं लुण्ठितम्- मुख्यमंत्री



हिमसंस्कृतवार्ताः - शिमला।
विधानसभा परिसरे पत्रकारैः सह वार्तालापं कुर्वन् मुख्यमन्त्री भाजपां पूर्वजयरामसर्वकारं च लक्ष्यं कृतवान्। २०२२ तमे वर्षे यदा काङ्ग्रेससर्वकारस्य निर्माणं जातम् तदा राज्यस्य आर्थिकदशा सुष्ठु नासीत् इति मुख्यमंत्री अवदत्. अस्य आर्थिकसंकटस्य मुख्यकारणं निर्वाचनात् पूर्वं भाजपासर्वकारेण वितरिताः निःशुल्कसेवाः आसन्। पूर्वजयरामसर्वकारेण निर्वाचनवर्षे राज्यकोषस्य शीघ्रं लुण्ठनस्य कार्यं कृतम्। निर्वाचनात् पूर्वमेव ६०० संस्थाः उद्घाटिताः आसन्। काङ्ग्रेस-सर्वकारेण सत्तां प्राप्तस्य एकवर्षे एव अर्थव्यवस्थायां २० प्रतिशतं विकासं कृत्वा २२०० कोटिरूप्यकाणां राजस्वं प्राप्तम्। आगामिमासात् आरभ्य वयं अधिकं विकासं करिष्यामः, प्रथमदिनाङ्के वेतनं दातुं प्रयतेम एतत् गम्भीरतापूर्वकं विचार्यते। परन्तु अधुना प्रश्नः उद्भवति यत् अद्यत्वे सर्वकारीयकर्मचारिणां महान् शुभचिन्तकं भाजपादलं किं एतद् सत्यम् न यद् भवद्भिः राज्यकोषं लुण्ठितमिति। विद्युत् मुक्तं कृतम्, बृहत् होटलेभ्यः विद्युत् अनुदानं दत्तम्। अस्य कारणात् विद्युत्मण्डलाय २२०० कोटिरूप्यकाणि दातव्यानि भविष्यन्ति। यदि एतत् न क्रियते तर्हि तेषां वेतनं पेन्शनं च संकटे भविष्यति।

# HP Vidhansabha: मुख्यमंत्री सुक्खुः सदने मुख्यमंत्री उक्तवान्- अस्य मासस्य वेतनं ५ दिनाङ्के, पेन्शनं च दशमे दिनाङ्के दीयते



**हिमसंस्कृतवार्ताः - शिमला।** बुधवासरे हिमाचलप्रदेशविधानसभायाः मानसूनसत्रे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सदनस्य क्रमबिन्दुना विपक्षेण उत्थापितस्य विषयस्य प्रतिक्रियारूपेण वक्तव्यं दत्तवान्। सदनं सूचयन् मुख्यमन्त्री अवदत् यत् राज्यकर्मचारिणां वेतनम् अस्य मासस्य पञ्चमदिनाङ्के अर्थात् ५ सितम्बर दिनाङ्के, पेन्शनभोक्तृभ्यः पेन्शनं च १० सितम्बर दिनाङ्के दास्यते। प्रथमदिनस्य स्थाने क्रमशः ५, १० तिथौ वेतनं पेन्शनं च दातुं मुख्यकारणम् अस्ति यत् अस्माकं सर्वकारः प्राप्तिभिः सह व्ययस्य आकलनं कृत्वा वित्तीयसम्पदां विवेकपूर्वकम् उपयोगं कर्तुम् इच्छति, यत् अस्माकं कुशलवित्तीयप्रबन्धने सहायकं भवति। एतादृशेन प्रबन्धनेन वयं राज्यसर्वकारेण गृहीतस्य ऋणस्य व्याजराशिं रक्षितुं प्रयत्नम् कुर्मः। असौ उक्तवान् यत् राज्यसर्वकारेण प्रत्येकमासस्य प्रथमे दिनाङ्के वेतनं पेन्शनं च दातव्यं भवति, यदा तु आरडीजी इत्यस्य मुख्यराशिः ५२० कोटिरूप्यकाणि, केन्द्रीयकरभागस्य ७४० कोटिरूप्यकाणि च भारतसर्वकारेण ६ दिनाङ्के प्राप्यन्ते। सुक्खुः अवदत् यत् प्रथमदिनाङ्के वेतन- पेन्शन- देयतायै राज्यसर्वकारः प्रायः ७.५० प्रतिशतं दरेन विपणात् अग्रिमऋणं गृहीत्वा अनावश्यकरूपेण व्याजस्य भारं वहति। वित्तविवेकार्थं वर्तमानसर्वकारेण व्ययस्य नक्शाङ्कनं प्राप्तिभिः सह करणीयम् येन ऋणराशिं वर्धयित्वा अनावश्यकं व्याजभारं न्यूनीकर्तुं शक्यते। एवं प्रकारेण सर्वकारस्य प्राप्तिभिः सह व्ययस्य नक्शाङ्कनं कृत्वा प्रतिमासं प्रायः ३ कोटिरूप्यकाणां राशिः रक्षिता भविष्यति। एषा व्यवस्था सर्वकारीयमण्डलानां निगमानाञ्च कृते न भविष्यति, ये स्वसम्पदां मूल्याङ्कनं कृत्वा स्वयमेव निर्णयं कर्तुं शक्नुवन्ति। मुख्यमन्त्री सदनं अपि सूचितवान् यत् केन्द्रसर्वकारात् प्राप्तस्य अनुमतेः आधारेण केवलं २३१७ कोटिरूप्यकाणि विपणात् ऋणं संग्रहीतुं अवशिष्टानि सन्ति, यस्य राज्यसर्वकारेण आगामिषु चतुर्षु मासेषु अर्थात् सेप्टेम्बरमासात् विवेकपूर्वकम् उपयोगः कर्तव्यः अस्ति डिसेम्बरमासपर्यन्तं कर्तव्यं भविष्यति। अपरपक्षे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यस्य उत्तरं सम्पन्नमात्रेण विपक्षस्य नेता जयरामठाकुर इत्यादयः विपक्षसदस्याः घोषान् उद्घृत्य सदनात् निर्गन्तुम् आरब्धवन्तः। तावत्पर्यन्तं सभापतिः मध्याह्नभोजनविरामस्य अनन्तरं यावत् विधानसभायाः स्थगनस्य घोषणां कृतवान्।

# पलायनकारणात् अयोग्यतां प्राप्तानां पूर्वविधायकानां वृत्तिः स्थगिता भविष्यति, विधानसभायां विधेयकं पारितम्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे पलायनकारणात् अयोग्यघोषितानां पूर्वविधायकानां पेन्शनं स्थगयितुं सज्जता वर्तते। यदि तेषां पेन्शन-अधिकारः वंचितः भवति तर्हि पूर्व-विधायकानां कृते अपि पूर्व-राशिः प्रत्यर्पिता भविष्यति । पलायनं निरुत्साहयितुं बुधवासरे हिमाचलविधानसभायां विधानसभासदस्यानां अंश-वृत्ति-विधेयकं पारितम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मंगलवासरे विधानसभायां एतत् संशोधनविधेयकं प्रस्तुतवान्। बुधवासरे सदने चर्चां कृत्वा विधेयकं पारितम्। विधेयकं पारितं कृत्वा इदानीं राज्यपालस्य अनुमोदनानन्तरं वैधानिकरूपं ग्रहीष्यति। तत्र प्रावधानं भवति यत्, तस्य विपरीतम् किमपि अस्ति चेदपि, यदि कदापि संविधानस्य दशम-अनुसूची-अन्तर्गतं अयोग्यः घोषितः अस्ति तर्हि कोऽपि व्यक्तिः अधिनियमस्य अन्तर्गतं पेन्शन-अधिकारं न प्राप्नुयात् यदि कश्चन व्यक्तिः अस्मिन् उपधारा अन्तर्गतं पेन्शन-अधिकारात् वंचितः भवति तर्हि तस्य पक्षतः पूर्वमेव आकृष्टं पेन्शनं यथा निर्धारितं भवति तथा पुनः प्राप्तं भविष्यति

# एतानि कारणानि विधेयकस्य मध्ये उल्लेखितव्यानि

विधेयकस्य संशोधनस्य कारणानि व्याख्याय लिखितम् आसीत् यत् विधानसभासदस्यानां अंशं, वृत्तिं च प्रदातुं दृष्ट्या एतत् प्रवर्तितम्। सम्प्रति भारतस्य संविधानस्य दशमानुसूचिकायाः अन्तर्गतं विधायिकासदस्यानां पलायनं निरुत्साहयितुं अधिनियमे कोऽपि प्रावधानम् नास्ति । अतः राज्यस्य जनानां दत्तस्य जनादेशस्य रक्षणाय, लोकतान्त्रिकमूल्यानां संरक्षणाय च संवैधानिक उद्देश्यस्य संशोधनं करणीयम् अभवत् । राजनैतिकसंकटात् पुनः स्वस्थतां प्राप्य सर्वकारस्य कठिननिर्णयम्, एषः देशे प्रथमं एतादृशं विधानं भविष्यति। राजनैतिकसंकटात् पुनः स्वस्थतां प्राप्य एतादृशं नियमं कर्तुं सर्वकारेण कठिनः निर्णयः कृतः। सभापतिना षट् काङ्ग्रेसविधायकान् सुधीरशर्मा, राजेन्द्रराणा, देवेन्द्रकुमारभुट्टो, चैतन्यशर्मा, रविठाकुर, इन्द्रदत्तलखनपालः च लोभेन दलान्तरणस्य आरोपेण अयोग्यतां प्राप्तवन्तः आसन्। उपनिर्वाचनं कृत्वा सुधीरः लखनपालः च भाजपातः विधायकौ अभवताम्, परन्तु अयोग्यपूर्वविधायकवर्गे स्थिताः राणा, भुट्टो, चैतन्यः, रविठाकुरः च विजयं प्राप्तुं न शक्तवन्तः। राज्यपालस्य अनुमोदनानन्तरं एव एतत् अधिनियमं वैधानिकरूपं ग्रहीष्यति। अयोग्यविधायकानां पेन्शनं स्थगयितुं देशे एतादृशं प्रथमं विधानम् भविष्यति।

हिमसंस्कृतवार्ताः
दैनिक ई-संस्कृतवार्तापत्रम्
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
3 | 05.09.2024 गुरुवासरः   वि.सं. २०८० भाद्रपदशुक्लतृतीया भाद्रपद 21 प्रविष्ठांशः
Website- www.himsanskritam.com   Emai|-himsanskrit@gmai|.com

# शिक्षकदिवसः



स्वाधीन-भारतस्य द्वितीय-राष्ट्रपतेः विदग्धपण्डितस्य, महतः दार्शनिकस्य तथा शिक्षाविदः डा० सर्वपल्ली-राधाकृष्णनः जन्म १८८८-तमे ख्रिष्टाब्दे, ५-सेप्तेम्बर-दिनाङ्के जातमासीत्, वर्तमानस्य तमिलनाड़ु-राज्यस्य 'तिरुतानि'-नामके लघुनगरे । तस्य पितुः नाम वीरस्वामी, एवं मातुः नाम च सीतात्मा इति आसीत् । सर्वपल्ली-राधाकृष्णन् बाल्यतः एव मेधावी, तथा प्रतिभापन्नः छात्रः आसीत् । सः पित्रोः द्वितीयः सन्तानः । चतुर्वर्षीयः सः शिक्षाग्रहणार्थं विद्यालयं गच्छति स्म । तिरुतानि-प्राथमिक-बर्डविद्यालयतः तस्य शिक्षारम्भः जातः । प्राथमिकीं शिक्षां समाप्य १८९६-तमे वर्षे तिरुपतिस्थिते 'हार्मानवार्ग-इभानजेलिकेल-लुथारियन' इति नामके महाविद्यालये तस्य नामपञ्जीकरणं सञ्जातम् । अयं महाविद्यालयः जार्मन-मिशनेरिद्वारा परिचालितः आसीत्, यत्र च 'वाइवेल' इति विषयोऽपि अध्येतव्यः आसीत् । परन्तु राधाकृष्णन् स्वगृहे हि हिन्दुधर्मसम्बद्धानि नानापुस्तकानि पठितुम् आरभत ।

राधाकृष्णन् कश्चन मध्यम-प्रतिभायुक्तः छात्रः आसीत् । १९०१-तमे ख्रिष्टाब्दे 'भेलोर'-स्थिते महाविद्यालये तेन नामपञ्जीकरणं कृतम्, ततः गभीरतया अध्येतुम् आरभत । १९०२-तमे वर्षे सुख्यात्या प्रवेशिका-परीक्षाम् उत्तीर्य धनपुरस्कारञ्च लब्धवान् । एवं १९०६- तमे वर्षे सः माद्राज-ख्रीष्टियान्-महाविद्यालयतः सम्यक्तया वी.ए. परीक्षायाम् उत्तीर्णतां गतः । एवमेव १९०८-तमे वर्षे माद्राज-विश्वविद्यालयतः दर्शनशास्त्रे एम्.ए. उपाधिं लब्धवान् । उल्लेखनीयं यत् एम्.ए. परीक्षायां माद्राज-विश्वविद्यालयतः सः सर्वोच्चान् अङ्कान् प्राप्य कृतित्वम् अर्जितवानासीत् । राधाकृष्णन् एम्.ए. परीक्षाम् उत्तीर्य, तदनन्तरं यद्यपि उच्चशिक्षार्थं विदेशं गन्तुम् ऐच्छत् तथापि गृहस्य असौविध्यकारणतः सः 'माद्राज-एडुकेश्यनेल' इति वृत्या सह संलग्नः अभवत्, एवमेव स्वकीयं कर्मजीवनमपि प्रारभत । शनैः सः 'माद्राज-प्रेसिडेन्शी-महाविद्यालये दर्शनविभागस्य सहकारि-अध्यापकत्वेन नियुक्तिम् अलभत । एतस्मिन् महाविद्यालये यदा कार्यं कुर्वन् आसीत् तदा शिक्षक-प्रशिक्षणम् लब्धुं 'चाइडापेड' इत्यत्र स्थितं शिक्षक-प्रशिक्षण-महाविद्यालयं प्रति सः प्रेषितोऽभवत् । राधाकृष्णन् यदा प्रेसिडेन्शी-महाविद्यालये अध्यापनकार्यं कुर्वन् आसीत्, तत्समये सः नैकान् प्रबन्धान् लिखितवान् । तेन भारतीयदर्शनम् एवम् यूरोपीय-चिन्ताधाराम् अनुसृत्य प्रदत्ताः वक्तृताः शिक्षार्थिनः विशेषतया आकृष्टवत्यः आसन् । तत्समये 'Essential of Psychology' इति नामकः ग्रन्थः 'Oxford University Press' इत्यनेन प्रकाशितः । शिक्षक-प्रशिक्षणं समाप्य, ततः प्रत्यागत्य च सः पुनः महाविद्यालयाय पूर्ववत् अध्यापनकार्यरूपं सहयोगं प्रदत्तवान् ।

परवर्तिकाले १९१८-तमे वर्षे सः महीशूर-विश्वविद्यालये दर्शनविभागस्य अध्यापकत्वेन दायित्वं निरवहत् । महीशूरे निवसन् सः 'The Philosophy of Rabindranath Tagore' तथा 'The Reign of Religion' इति नामकं ग्रन्थद्वयं विरचितवान् । महीशूर-विश्वविद्यालये वर्षत्रयं यावत् अध्यापनकार्यं विधाय, तदनन्तरं कलिकता-विश्वविद्यालयतः निमन्त्रणं प्राप्य, तत्र समेत्य च दर्शनविभागस्य 'King George' आसनस्य 'Mental and Moral Science' इति विषये योगदानं कृतवान् । तस्य कर्मजीवनावधौ नानाविषयान् अनुसृत्य तेन लिखिताः बहुशः प्रबन्धाः प्रकाशिताः जाताः । एवं १९२९-तमे वर्षे अध्यापनार्थं मानचेष्टार-महाविद्यालयतः पुनः नूतनं निमन्त्रणं तेन प्राप्तम् । अत्र अध्यापनसमये तेन अक्सफर्ड-विश्वविद्यालयस्य छात्रान् पाठयितुं सौभाग्यं लब्धम् । १९३१ तः १९३५-तमवर्षपर्यन्तं डा० राधाकृष्णन् 'अन्ध-विश्वविद्यालय'स्य उपाचार्यत्वेन कार्यम् अकरोत् । तत्समये सः विश्वविद्यालयस्य शैक्षिकदिशि यथेष्टम् उन्नतिं साधितवान् । १९३६ तः १९३९-तमवर्षपर्यन्तम् अक्सफोर्ड-विश्वविद्यालये 'स्पेल्डिङ् प्रोफेसर अव इष्टार्ण रिलिजन' इति उपाधित्वेन सः शिक्षकतायाः दायित्वं निरवहत् । १९१९-तमे वर्षे राधाकृष्णन् वानारस-हिन्दु-विश्वविद्यालस्य उपाचार्यः संजातः, एवं १९४८-तमवर्षपर्यन्तं तद्दायित्वं निरुढवान् । तस्य दर्शनविषयकम् अवदानम् अतुलनीयं वर्तते । भारतीय-दर्शनसम्बद्धान् मूल्यवतः ग्रन्थान् सः बहुधा विरचितवान् । तेषु ग्रन्थेषु - 'The Philosophy of Rabindranath Tagore', The reign of Religion', 'Indian Philosophy' (Vol.- l & II, Hindi), An Idealist view of life', 'The Principle of Upanishadas', 'The Religion we need', 'The Hindu view of life' इत्यादयः उल्लेखनीयाः सन्ति । भारतस्वाधीनस्य अनन्तरं स्वाधीनभारतस्य शिक्षाव्यवस्थायाः आमूलपरिवर्तनोद्देश्येन राधाकृष्णमहोदयाय 'विश्वविद्यालय-शिक्षा-आयोगः' (University Education Commission) इत्यनेन अध्यक्षपदं प्रदत्तमासीत् । महोदयस्य नेतृत्वे प्राथमिकपर्यायतः विश्वविद्यालयपर्यन्तं शिक्षासंस्कारस्य कृते नीति-निर्देशनादिकं सज्जीभूतम् । १९४९ तः १९५२ तमवर्षपर्यन्तं तेन स्वाधीनभारतस्य 'सोभियेट-यूनियन' इत्यत्र प्रथमः राष्ट्रदूतत्वेन कार्यनिर्वहणं कृतम् । १९५२-तमवर्षस्य मै-मासे राधाकृष्णन् भारतस्य प्रथम-उपराष्ट्रपतिरूपेण अधिष्ठितः अभवत् । १९५४-तमवर्षे भारतसर्वकारः तं 'भारतरत्न'उपाधिना विभूषितवान् । १९५७-तमवर्षे सः पुनः द्वितीयपर्यायार्थम् उपराष्ट्रपतित्वेन निर्वाचितः अभवत् । परवर्तिसमये अर्थात् १९६२-तमे वर्षे सः भारतस्य द्वितीयः राष्ट्रपतिः जातः । राधाकृष्णन् यदा राष्ट्रपतिः अभवत् तदा तस्य केचन छात्राः बान्धवाश्च तस्य जन्मदिवस-पालनार्थं तस्मात् अनुमतिं याचितवन्तः । तदा सः उक्तवान् यत् - " अहम् अन्येभ्यः राष्ट्रपतित्वेन, राजनीतिज्ञत्वेन, दार्शनिकत्वेन वा स्वपरिचयं प्रदातुं नेच्छामि ; तत्सर्वं विहाय शिक्षकत्वेन हि स्वपरिचयं दातुमिच्छामि ; यतोहि आजीवनं मया शिक्षायाः सेवा कृता, एतदेव मम गौरवमिति चिन्तयामि । दिवसोऽयं केवलं मम व्यक्तिगत-जन्मदिवसत्वेन न पालनीयः, अपितु तदपेक्षया देशस्य समस्तशिक्षकेभ्यः सम्मान-आदर-कृतज्ञतादीन् प्रदातुं 'शिक्षक-दिवस'त्वेन अयं दिवसः सम्यक् आचरणीयः, अनेन हि अहं सुखी, प्रसन्नश्च भवेयम् । " इति ।

ततः आरभ्य आदेशं ५-सेप्तम्बर-दिनाङ्के 'शिक्षक-दिवसः' इति पर्व आचर्यमाणमस्ति प्रतिवर्षम् । एतादृशस्य महामनीषिणः १९७५ -तमवर्षस्य १७-अप्रैल दिनाङ्के महाप्रस्थानम् अभवदिति । शुभम् ! ओं सर्वेभ्यो गुरुभ्यो नमः ! --

**नारदोपाध्यायः, असमराज्यम्**

## हिमसंस्कृतवार्तापरिवारपक्षतः

### शिक्षकदिवसस्य हार्दिक्यः शुभकामनाः

**हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः ।**

**गुरू ब्रह्मा गुरू विष्णु, गुरु देवो महेश्वरः।**
**गुरु साक्षात् परब्रह्म, तस्मै श्री गुरुवे नमः।**

विश्वस्य अनेकेषु देशेषु शिक्षकाणां (गुरुणां) विशेषसम्मानं दातुं शिक्षकदिवसस्य आयोजनं भवति। केषुचित् देशेषु अवकाशदिवसः अस्ति, केषुचित् देशेषु कार्यं कुर्वन्तः अयं दिवसः आचरन्ति। भारतस्य पूर्वराष्ट्रपतिः डॉ. सर्वपल्ली राधाकृष्णनस्य जन्मदिवसः (५ सितम्बर) भारते शिक्षकदिवसरूपेण आचर्यते।

## गुरुनाम धृत्वा हि त्वमसि आदाता

गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः
गुरुः साक्षात् परम्ब्रह्म तस्मै श्रीगुरवे नमः
तस्मै श्रीगुरवे नमः, तस्मै श्रीगुरवे नमः
गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता
गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता
चलाचलजातं सांसारिककृत्यं
चलाचलजातं सांसारिककृत्यं
गुरुस्त्वम् उन्मोचय आशिषभण्डारं
गुरुस्त्वम् उन्मोचय आशिषभण्डारं
गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता ---- (००)
गुरुविधिं गुरुविष्णुं गुरुदेवं महेश्वरं
स्मरित्वा हि सदा पूजयामः नू गुरुपादद्वयं
गुरुविधिं गुरुविष्णुं गुरुदेवं महेश्वरं
स्मरित्वा हि सदा पूजयामः नू गुरुपादद्वयं
अबोधशिशुसन्ताने भूयाः कृपाकरः
अबोधशिशुसन्ताने भूयाः कृपाकरः
दूरेऽपि अहं ननु सदा हे त्वदीयः
दूरेऽपि अहं ननु सदा हे त्वदीयः
गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता ----- (०१)
पूज्यपूजाकारणाय अददा नू ही शिक्षां
हृदयपटले तां धारयामः लेखां
पूज्यपूजाकारणाय अददा नू ही शिक्षां
हृदयपटले तां धारयामः लेखां
कोटिकोटिप्रणमनं स्वीकुरु मे गुरुः
कोटिकोटिप्रणमनं स्वीकुरु मे गुरुः
गुणं तव गायं गायं ए जीवं प्रयातु
गुणं तव गायं गायं ए जीवं प्रयातु
गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता
चलाचलजातं सांसारिककृत्यं
चलाचलजातं सांसारिककृत्यं
गुरुस्त्वम् उन्मोचय आशिषभण्डारं
गुरुस्त्वम् उन्मोचय आशिषभण्डारं
गुरुनाम धृत्वा हि त्वमसि आदाता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता
अगणितच्छात्रजाते शिक्षादानकर्ता ------ (०२)

**रचयिता- डॉ. रुरुकुमारमहापात्रः**
(अध्यापकः) राष्ट्रियसंस्कृत-विश्वविद्यालयः, तिरुपतिः

## गुरुविरजानन्दगुरुकुलमहाविद्यालये करतारपुरे संस्कृतसम्भाषणशिबिरस्य आरम्भः

**हिमसंस्कृतवार्ताः, भगवतीप्रसादः जालन्धरम्।** केन्द्रीयसंस्कृतविश्वविद्यालय-नवदेहली द्वारा संचालितमुक्तस्वाध्यायपीठस्य संस्कृताध्ययनकेन्द्रे गुरुविरजानन्दगुरुकुलमहाविद्यालये करतारपुरे संस्कृतसम्भाषणशिबिरस्य आरम्भः कृतः। यस्मिन् महाविद्यालयस्य बहवः छात्राः भागं गृहीतवन्तः। संस्कृतसम्भाषणशिबिरस्य उद्घाटनसत्रे गुरुकुलस्य प्राचार्यः संस्कृताध्ययनकेन्द्रस्य केन्द्राधिकारी च डॉ. उदय आर्यः सर्वेभ्यः प्रतिभागिभ्यः संस्कृतसम्भाषणस्य संस्कृताध्ययनकेन्द्रस्य च विषये सूचनां प्रदातुं सर्वेभ्यः संस्कृताय प्रमुखं स्थानं दातुं प्रोत्साहितवान् तेषां दैनन्दिनजीवने वार्तालापः। संस्कृतसम्भाषणशिबिरस्य उद्घाटनसत्रस्य मुख्यातिथिः स्वामी प्रवीनः भारतीयसाहित्ये संस्कृतस्य योगदानस्य विषये कथयन् सर्वान् छात्रान् अभिनन्दितवान्। तेन सह शिबिरसंयोजकः, संस्कृताध्ययनकेन्द्रस्य अध्यापकश्च भगवतीप्रसादः सर्वेभ्यः प्रतिभागिभ्यः संस्कृतस्य सूक्ष्मतां व्याख्याय संस्कृतवार्तालापस्य अभ्यासं कारितवान् । अवसरेस्मिन् गुरुकुलमहाविद्यालयस्य सर्वे शिक्षकाः उपस्थिताः

